# শ্রীসীতারামাষ্টকম্

{॥ শ্রীসীতারামাষ্টকম্ ॥}

ব্রহ্মমহেন্দ্রসুরেন্দ্রমরুদ্গণরুদ্রমুনীন্দ্রগণৈরতিরম্যং

ক্ষীরসরিৎপতিতীরমুপেত্য নুতং হি সতামবিতারমুদারম্ ।

ভূমিভরপ্রশমার্থমথ প্রথিতপ্রকটীকৃতচিদ্ঘনমূর্তিম্ ।

ত্বাং ভজতো রঘুনন্দন দেহি দযাঘন মে স্বপদাম্বুজদাস্যম্ ॥ ১॥

পদ্মদলাযতলোচন হে রঘুবংশবিভূষণ দেব দযালো

নির্মলনীরদনীলতনোঽখিললোকহৃদম্বুজভাসক ভানো ।

কোমলগাত্র পবিত্রপদাব্জরজঃকণপাবিত গৌতমকান্ত ।

ত্বাং ভজতো রঘুনন্দন দেহি দযাঘন মে স্বপদাম্বুজদাস্যম্ ॥ ২॥

পূর্ণ পরাৎপর পালয মামতিদীনমনাথমনন্তসুখাব্ধে

প্রাবৃডদভ্রতডিৎসুমনোহরপীতবরাম্বর রাম নমস্তে ।

কামবিভঞ্জন কান্ততরানন কাঞ্চনভূষণ রত্নকিরীট ।

ত্বাং ভজতো রঘুনন্দন দেহি দযাঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৩॥

দিব্যশরচ্ছশিকান্তিহরোজ্জ্বলমৌক্তিকমালবিশালসুমৌলে

কোটিরবিপ্রভ চারুচরিত্রপবিত্র বিচিত্রধনুঃশরপাণে ।

চণ্ডমহাভুজদণ্ডবিখণ্ডিতরাক্ষসরাজমহাগজদণ্ডম্ ।

ত্বাং ভজতো রঘুনন্দন দেহি দযাঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৪॥

দোষবিহিংস্রভুজঙ্গসহস্রসুরোষমহানলকীলকলাপে

জন্মজরামরণোর্মিময়ে মদমন্মথনক্রবিচক্রভবাব্ধৌ ।

দুঃখনিধৌ চ চিরং পতিতং কৃপয়াদ্য সমুদ্ধর রাম ততো মাম্ ।

ত্বাং ভজতো রঘুনন্দন দেহি দয়াঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৫॥

সংসৃতিঘোরমদোৎকটকুঞ্জরতৃটক্ষুদনীরদপিণ্ডিততুণ্ডং

দণ্ডকরোন্মথিতং চ রজস্তম উন্মদমোহপদোজ্ঝিতমার্তম্ ।

দীনমনন্যগতিং কৃপণং শরণাগতমাশু বিমোচয় মূঢম্ ।

ত্বাং ভজতো রঘুনন্দন দেহি দয়াঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৬॥

জন্মশতার্জিতপাপসমন্বিতহৃৎকমলে পতিতে পশুকল্পে

হে রঘুবীর মহারণধীর দয়াং কুরু ময্যতিমন্দমনীষে ।

ত্বং জননী ভগিনী চ পিতা মম তাবদসি ত্ববিতাপি কৃপালো ।

ত্বাং ভজতো রঘুনন্দন দেহি দয়াঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৭॥

ত্বাং তু দয়ালুমকিঞ্চনবৎসলমুৎপলহারমপারমুদারং রাম

বিহায় কমন্যমনাময়মীশ জনং শরণং ননু যায়াম্ ।

ত্বৎপদপদ্মমতঃ শ্রিতমেব মুদা খলু দেব সদাব সসীত ।

ত্বাং ভজতো রঘুনন্দন দেহি দয়াঘন মে স্বপদাম্বুজদাস্যম্ ॥ ৮॥

যঃ করুণামৃতসিন্ধুরনাথজনোত্তমবন্ধুরজোত্তমকারী

ভক্তভয়োর্মিভবাব্ধিতরিঃ সরযূতটিনীতটচারুবিহারী ।

তস্য রঘুপ্রবরস্য নিরন্তরমষ্টকমেতদনিষ্টহরং বৈ যস্তু

পঠেদমরঃ স নরো লভতেঽচ্যুতরামপদাম্বুজদাস্যম্ ॥ ৯॥

॥ ইতি শ্রীমন্মধুসূদনাশ্রমশিষ্যাচ্যুতযতিবিরচিতং

শ্রীসীতারামাষ্টকং সম্পূর্ণম্ ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Sita Rama Ashtakam Lyrics in Bengali PDF
% File name : siitaaraama8.itx
% Category : aShTaka
% Location : doc_raama
% Author : achyutayati
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : http://www.webdunia.com
% Proofread by : Kirk Wortman kirkwort at hotmail.com
% Latest update : January 13, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website